# श्रीमद् भागवत रसिक कुटुंब

## श्री शिवाष्टकम्

प्रभुं प्राणनाथं(वँ) विभुं(वँ) विश्वनाथं(ञ्),
जगन्नाथनाथं सदानन्दभाजम् ।
भवद्भव्यभूतेश्वरं भूतनाथं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ १॥

गले रुण्डमालं(न्) तनौ सर्पजालं,
महाकालकालं(ङ्) गणेशाधिपालम् ।
जटाजूटगङ्गोत्तरङ्गैर्विशालं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ २॥

मुदामाकरं मण्डनं मण्डयन्तं,
महामण्डलं भस्मभूषाधरं(न्) तम् ।
अनादिह्यपारं महामोहहारं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ ३॥

वटाधोनिवासं महाट्टाट्टहासं,
महापापनाशं सदासुप्रकाशम् ।
गिरीशं(ङ्) गणेशं महेशं सुरेशं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ ४॥

गिरिन्द्रात्मजासंग्रहीतार्धदेहं(ङ्),
गिरौ संस्थितं सर्वदा सन्नगेहम् ।
परब्रह्मब्रह्मादिभिर्वन्ध्यमानं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ ५॥

कपालं(न्) त्रिशूलं(ङ्) कराभ्यां(न्) दधानं,
पदाम्भोजनम्राय कामं(न्) ददानम्।
बलीवर्दयानं सुराणां प्रधानं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ ६॥

शरच्चन्द्रगात्रं(ङ्) गुणानन्दपात्रं(न्),
त्रिनेत्रं पवित्रं(न्) धनेशस्य मित्रम् ।
अपर्णाकलत्रं(ञ्) चरित्रं(वँ) विचित्रं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ ७॥

हरं सर्पहारं(ञ्) चिता भूविहारं,
भवं(वँ) वेदसारं सदा निर्विकारम् ।
श्मशाने वसन्तं मनोजं(न्) दहन्तं,
शिवं शङ्करं शम्भुमीशानमीडे ॥ ८॥

स्तवं(यँ) यः(फ्) प्रभाते नरः(श्) शूलपाणे,
पठेत् सर्वदा भर्गभावानुरक्तः ।
स पुत्रं(न्) धनं(न्) धान्यमित्रं(ङ्) कलत्रं(वँ),
विचित्रं समासाद्य मोक्षं प्रयाति ॥ ९॥

॥ इति शिवाष्टकं सम्पूर्णम् ॥